सुरधुनी (Suradhunī)
अन्तराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-1, Issue-1, January-2022, Published by: World Sanskrit-Shastra Association (WSSA),
Name of Issuing- दर्शनतत्त्वविमर्शः(Darshan-Tattva-Vimarsh) (Page 1-3)

# अदृष्टतत्वविचारः

डँ.बिष्णुपदमहापात्रः*

न्यायवैशेषिकनये द्रव्यगुणकर्मसामान्यविशेषसमवायाभावभेदात् सप्तपदार्थाः प्रसिद्धाः सन्ति। तेषु सप्तपदार्थेषु द्वितीयपदार्थः गुणो भवति। गुणास्तु रुपरसगन्धादिभेदेन चर्तुविंशतिप्रकारकाः सन्ति। तत्र वैशेषिकसूत्रकारैः कणादै‘रुपरसगन्धस्पर्शः संख्या परिमाणानि पृथकत्त्वं संयोगविभागौ परत्वापरत्वे बुद्धय; सुखदुखे इच्छाद्वेषौ प्रयत्नाश्च गुणाः’,[१] इति विभागसूत्रे सप्तदश कण्ठेणोक्ताः। सूत्रस्थ च शव्देन गुरुत्वद्रवत्व-स्नेह-संस्कार-धर्माऽधर्मा-शब्दाः समुच्चिताः , ते सर्व मिलित्वा चतुर्विंशतिगुणाः प्रसिद्धाः सन्ति। एते सर्वे गुणाः समवायसम्बन्धेन द्रव्ये एव तिष्ठति। द्रव्यत्वं स्नेहसंस्कारावदृष्टं शब्द एव च,[२] इति कारिकायां प्रतिपादित योहि अदृष्टशब्दः स धर्मस्य अधर्मस्य च वाचकः। तच्चादृष्टं कार्यत्वावच्छिन्नं प्रति साधारणकारणम् तथाहि ईश्वरस्तज्ज्ञाकृतयः प्रागभावकालदिगदृष्टानि[३] इति। अदृष्टञ्च जीवात्मवृत्तिः। धर्माधर्मयोप्रत्यक्षत्वात् तयोरदृष्टमिति संज्ञा । अदृष्टापराभिधानस्य धर्मस्य लक्षणं सूत्रकारै कणादै उक्तं- यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः[४], धर्मविशेषप्रसूताद...,[५] आत्मान्तरगुणानामात्मान्तरेकारणत्वात्,[६] दृष्टानां दृष्टादृष्टप्रयोजनानां दृष्टाभावे प्रयोजनमभ्यदयाय७। एभिः सूत्रैः वैशेषिकसूत्रकारैः अदृष्टस्य महत्वं, आत्मगुणत्वं, आत्ममनसोः सहयोगात् अदृष्टस्योत्पत्तिरितिकथनम्, वर्णाश्रमिणां कृते धर्मस्य निमित्तकारणत्वं, धर्मस्य कार्यं यत्सुखमोक्षादिकं भवति तस्य साधनत्वेन धर्मस्य प्रतिपादनमित्यादिविषयादिविषयानालोड़नं कृतमिति। चार्यैः सूत्राणां ब्याख्यानावसरे प्रसस्तपादाचिर्ये-धर्मः पुरुषगुणः, कर्तुः प्रियहेतुमोक्षः, अतीन्दियः, अन्त्यसुखसंविज्ञानविरोधी, पुरुषान्तःकरणसंयोगवि-शुद्धाभिसन्धिजः— वर्णाश्रमिणं सामान्यविशेष-भावेनावस्थितानि द्रव्यगुणकर्माणि, इति।[८]

तत्र धर्मस्य सामान्यसाधनानि भवन्ति धर्मे श्रद्धा, अहिंसा भुतहितत्वम्, सत्यवचनम,अस्तेयम्, बह्मचर्यम्,अनुपधा, क्रोधवर्जनम्, अभिसेचनम्, शुचिद्रव्यसेवनम्, विशिष्टदेवताभक्तिः, उपवासोऽप्रमादश्च। ब्राह्मणक्षत्रियवैश्यानां कृते सामान्यानि धर्मसाधनानि इज्याध्ययनदानानि भवन्ति। ब्राह्मणस्य विशेषसाधनानि प्रतिग्रहाध्यपनयाजनानि स्ववर्णविहिताश्च संस्काराः क्षत्रियस्य कृते सम्यकप्रजापालनम्, वैश्यस्य कृते

*आचार्यः नव्यन्यायविभाग, श्री.ला.ब.शा.रा.सं.विश्वविद्यालयः, नवदेहली, भारतवर्षम्।

सुरधुनी (Suradhunī)
अन्तराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-1, Issue-1, January-2022, Published by: World Sanskrit-Shastra Association (WSSA),
Name of Issuing- दर्शनतत्त्वविमर्श:(Darshan-Tattva-Vimarsh) (Page 1-3)

क्रयविक्रयपशुपालनानि स्वकीयाश्च संस्कारा: शुद्रस्य कृते पूर्ववर्णपारतन्त्रम् अमन्त्रिकाश्च क्रिया: धर्मस्य साधनानि भवन्ति। अनेन प्रकारेण समेषां कृते धर्मसाधनं वैशेषिकै: प्रतिपादितम्। न्यायभाष्यकारैरपि एतत्सर्वं मनसि निधाय स्वभाष्ये लिखितं यत्-

अथ शुभा:-शरीरेण दानं परित्राणं परिचरणं चेति, वाचा सत्यं हितं प्रियं स्वाध्याय चेति , मनसा दयामस्पृहां श्रद्धां चेति सेयं धर्माय, इति ।अतएव शास्त्रज्ञै: धर्मस्य लक्षणं कृतम्-धर्म: श्रुतिविहितकर्मजन्य:,[१०] अधर्मस्तावत् श्रुतिनिषिद्धाचारणजन्य:,[११] दौषै: प्रयुक्तं कर्म अधर्माय भवति। तथा च दोषै: प्रयुक्त: -शरीरेण प्रवर्तमानो हिंसास्तेयप्रतिषिद्धमैथुनान्याचरति, वाचाऽनृतपरुषसूचनाऽसंवद्धानि, मनसा परद्रोहं परद्रव्याभीप्सां नास्तिकं चेति, सेयं पापात्मिका प्रवृत्तिरधर्माय,[१२]इति। एतादृश अधर्मोऽपि आत्मगुण:, कर्तुरहितप्रत्यवायहरतु: अतीन्दियश्च भवति ।धर्माऽधर्मो इत्याख्या योहि अदृष्टपदार्थ: तस्य जगन्नियामकत्वं ईश्वर इव वर्तते एव । क्षित्यङ्कुरादिकं सकर्तृकं कार्यत्वादित्यनुमानेन ईश्वर स्यास्तित्वं जगत्कर्तृत्वं सिद्ध्यति, समवायस्वरुपा-न्यतरसम्वन्धेन कार्यं प्रति स्वज्ञानविषयत्वसम्वन्धेनेश्वरस्य कारणत्वमेव । ईश्वरस्य कारणत्वसिद्धौ विनिगमकाभावेन तदीयज्ञानेच्छाकृतीनां नित्यानां कारणत्वं यथा सिद्ध्यति तथैव अदृष्टस्य जीवविशेषगुणत्वाज्जीवानाञ्चासङ्ख्य-त्वाज्जन्योत्पादमात्रस्य सजीवप्रयोजनकत्वादुपभोगस्यैव च प्रयोजनत्वात् यत्कार्यं येनोपभुज्यते तत्कार्यस्य तददृष्टबीजकत्वमश्यमेव बोध्यम्। एवञ्चेदानितनोत्पन्नघटादेरपि भोक्त्रदृष्टजनत्वात् सर्वत्र कार्येऽदृष्टस्य कारणत्वमभ्युपेयम्। कथमन्यथा चैत्रेणेतत् कार्यमुपभुज्यते न तु मैत्रेणेति दृश्यते। ऐतदभिप्रायेण साधारणकारणकुक्षौ अदृष्;स्य ग्रहणं विद्यते। यद्यपि समवायिकारणत्बं द्रव्यस्यैव, असमवायिकारणत्वं गुणकर्मणो: निर्धारितं विद्यते तथापि निमित्वकारणत्वेन ईश्वरस्यतज्ज्ञानेच्छादीनां यता ग्रहणं तथैव अदृष्टस्यापि ग्रहणं सम्भवत्येव। तत्त्वज्ञानं प्रति धर्मस्यापि कारणत्वं विद्यत एव। तथाह भाष्यकार:- द्रव्यगुणकर्मसामान्यविशेषसमवायानां षण्णां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्वज्ञानं नि:श्रेयसहेतु:। तच्चेश्वरचोदनाभिव्यक्ताद् धर्मादेव।[१३]

वैशेषिकसूत्रकारैरपि द्रव्यादिपदार्थविभागसूत्रे धर्मविशेषप्रसूताद् इति आदौ प्रतिपादित: । वस्तुत: इदमुपलक्षणम्, न्यायकुसुमाञ्जलिकारस्योदयनाचार्यस्य वचनं-

सुरधुनी (Suradhunī)
अन्तराष्ट्रीयानुसन्धानात्मकसंस्कृतान्तर्जालिकपत्रिका (पुनरीक्षिता)
An International Sanskrit E-Research Journal (Peer Reviewed)
Volume-1, Issue-1, January-2022, Published by: World Sanskrit-Shastra Association (WSSA),
Name of Issuing- दर्शनतत्त्वविमर्श:(Darshan-Tattva-Vimarsh) (Page 1-3)

''सापेक्षत्वादनादित्वाद्वैचित्र्याद्विश्ववृत्तित:।
प्रत्यात्मनियमाद् भुक्तेरस्ति हेतुरलौकिक:।''[१४]

सर्वथा अनुसन्धेयम्।अदृष्टस्य कारणतायां कालिकसम्बन्धेनैव कार्यकारणभावस्य सुवचत्वात् कार्यकारणतावच्छेदकसम्बन्ध्त्वं कालिकस्येति नैयायिकानां वैशेषिकाणां च सिद्धान्त:।

- **तथ्यसूत्रम:**

१. वै.सू.,१/१/६
२. कारिकावली-५
३. तर्का, पृ-१५
४. वै.सू.,१/१/२
५. वै.सू.,१/१/४
६. वै.सू.,६/१/५
७. वै.सू.,१०/२/८
८.प्र.भा.पृ-२०२
९.न्या.भा,पृ-१५
१०.तर्का, पृ-१०
११. .तर्का, पृ-१०
१२. न्या.भा,पृ-१५
१३ प्र.भा.पृ-२
१४.न्या.कु, स्त-१/४

- **ग्रन्थसन्दर्भा:**

१. अन्नंभट्ट:, तर्कसंग्रह:, सम्पा– श्रीसत्कारिशर्माविङ्गीय:, वाराणसी:, चौखाम्वासंस्कृतसंस्थानम्, वाराणसी:, २०१२।
२. उदयनाचार्य:, आत्मतत्त्वविवेक:, सम्पा.— ढुन्दुराजशास्त्री, चौखाम्वासंस्कृतसीरिज अफिस, वाराणसी, २०११।
३. गौतम:, न्यायदर्शनम्, सम्पा.—तारानाथन्यायतर्कतीर्थ:, मुश्निराम मनोहरलालपाव्लिसार्स, नई दिल्ली:, २००३।
४. भट्टाचार्य:, दोनेशचन्द्र:, भट्टाचार्य:, मोहनश्च भारतीयदर्शनकोश:, संस्कृतमहाविद्यालय:, कलकाता, १९७६।

—-::—-